M. T. B COLLEGE, SURAT

Manuscripts Library

No. Ref.
Set. 142

Title: Ghadoska Nyasa

172

Ekādasha Nyāsa	:	Title
	:	Author
	:	Editor
	:	Year, Vols.
	:	Publisher
172	:	Remarks

ए॰ न्या॰
१

श्रीगणेशायनमः अथैकादशन्यासः अस्यश्री
नवार्णमंत्रस्य ब्रह्मविष्णुमहेश्वराऋषयः गा
यत्र्युष्णिगनुष्टुप्छंदांसि महाकालीमहाल
क्ष्मीमहासरस्वत्योदेवताः नंदाशाकंभरीभी
माशक्तयः रक्तदंतिकादुर्गाभ्रामर्योबीजानि
अग्निर्वायुःसूर्यस्तत्वानि वेदत्रयोद्भवंफलं १
जपादौन्यासेविनियोगः ॐ ब्रह्मविष्णुमहे

श्वरऋषिभ्योनमः शिरसि गायत्र्युष्णिगनुष्टु
प्छंदोभ्योनमः मुखे महाकालीमहालक्ष्मीम
हासरस्वतीदेवताभ्यो॰ हृदये नंदाशाकंभरी
भीमाशक्तिभ्यो॰ गुह्ये रक्तदंतिकादुर्गाभ्रा
मरीबीजेभ्योनमः पादयोः अग्निवायुःसूर्यस्त
त्वेभ्यो॰ सर्वांगे ॐ ऐं अंगुष्ठाभ्यां॰ ॐ ह्रीं त
र्जनीभ्यां॰ ॐ क्लीं मध्यमाभ्यां॰ ॐ चामुंडायैअना

ए॰ न्या॰
२

मिकाभ्यां॰ ॐ विच्चे कनिष्ठिकाभ्यां॰ ॐ ऐं ह्रीं क्लीं
चामुंडायै विच्चे करतलकरपृष्ठाभ्यां॰ एवं हृदया
दि ॐ ऐं नमः शिखायान्यसामि ॐ ह्रीं नमः ने
त्रयोः ॐ क्लीं नमः कर्णयोः ॐ चामुंडायै नासिका
यां ॐ विच्चे वक्त्रे ॐ ऐं ह्रीं क्लीं चामुंडायै विच्चे
गुह्ये मूलेन अष्टवारं व्यापकं कुर्यात् अथ एका
दशान्यासः ॐ ह्रीं अं नमः शिरसि ॐ ह्रीं आं २

नमः मुखे ॐ ह्रीं इं नमः दक्षिणनेत्रे ॐ ह्रीं ईं न
मः वामनेत्रे ॐ ह्रीं उं नमः दक्षिणकर्णे ॐ ह्रीं ऊं
नमः वामकर्णे ॐ ह्रीं ऋं नमः दक्षिणनासापुटे
ॐ ह्रीं ॠं नमः वामनासापुटे ॐ ह्रीं लृं नमः दक्षि
णगंडे ॐ ह्रीं लॄं नमः वामगंडे ॐ ह्रीं एं नमः
ऊर्ध्वोष्ठे ॐ ह्रीं ऐं नमः अधरोष्ठे ॐ ह्रीं ओं नमः
ऊर्ध्वदंतपंक्तौ ॐ ह्रीं औं नमः अधरदंतपंक्तौ

ए॰का॰
३

ॐ ह्रीं अंनमः मूर्ध्नि ॐ ह्रीं अः नमः आस्ये ॐ ह्रीं
कंनमः दक्षिणबाहुमूले ॐ ह्रीं खंनमः दक्षिण
कूर्परे ॐ ह्रीं गंनमः दक्षिणमणिबंधे ॐ ह्रीं घंन
मः दक्षिणहस्तांगुलिमूले ॐ ह्रीं ङंनमः वाम
हस्तांगुल्यग्रेषु ॐ ह्रीं टंनमः दक्षिणपादमूले
ॐ ह्रीं ठंनमः दक्षिणपादजानुनी ॐ ह्रीं डंनमः
दक्षिणगुल्फे ॐ ह्रीं ढंनमः दक्षिणपादांगुलि ३
मूले ॐ ह्रीं णंनमः दक्षिणपादांगुल्यग्रेषु

ॐ ह्रीं तंनमः वामपादमूले ॐ ह्रीं थंनमः वाम
जानुनी ॐ ह्रीं दंनमः वामगुल्फे ॐ ह्रीं धंनमः
वामपादांगुलिमूले ॐ ह्रीं नंनमः वामपादांगु
ल्यग्रेषु ॐ ह्रीं पंनमः दक्षिणपार्श्वे ॐ ह्रीं फं
नमः वामपार्श्वे ॐ ह्रीं बंनमः पृष्ठे ॐ ह्रीं भं
नमः नाभौ ॐ ह्रीं मंनमः उदरे ॐ ह्रीं यंत्वगा
त्मने हृदि ॐ ह्रीं रं असृगात्मने दार्मूलयोः

ए॰न्या॰
५

ॐ ह्रीं लं मांसात्मने ककुदि ॐ ह्रीं वं मेदात्मने कक्ष
द्वयोः ॐ ह्रीं रं अस्थ्यात्मने हृदयादि पाणियुगले
ॐ ह्रीं सं शुक्रात्मने जठरे ॐ ह्रीं हं प्राणात्मने मु
खे ॐ ह्रीं क्षं जीवात्मने सर्वांगे इति प्रथमः ॐ
ऐं ह्रीं क्लीं नमः कनिष्ठिकाभ्यां॰ ॐ ऐं ह्रीं क्लीं॰ अ
नामिकाभ्यां॰ ॐ ऐं ह्रीं क्लीं मध्यमाभ्यां॰ ॐ ऐं ह्रीं
क्लीं न॰ तर्जनीभ्यां॰ ॐ ऐं ह्रीं क्लीं न॰ अंगुष्ठाभ्यां॰
ॐ ऐं ह्रीं क्लीं नमः करतलकरपृष्ठाभ्यां नमः ॐ ५

ऐं ह्रीं क्लीं नमः कूर्पराभ्यां नमः ॐ ऐं ह्रीं क्लीं नमः म
णिबंधाभ्यां न॰ एवं हृदयादि इति सारस्वतो द्वि
तीयः ॐ ऐं ह्रीं ब्रह्माणि पूर्वे पातु ॐ ह्रीं स्त्रौं मा
हेश्वरी आग्नेय्यां पातु ओं ह्रीं क्लीं कौमारी दक्षिणे
पातु ॐ ह्रीं श्रीं वैष्णवी नैर्ऋत्यां पातु ॐ ह्रीं हूं वा
राही पश्चिमे पातु ॐ ह्रीं लं इंद्राणी वायव्ये पातु
ॐ ह्रीं क्ष्म्रौं नारसिंही उत्तरे पातु ॐ ह्रीं स्क्रें चामु
डा ईशान्ये पातु ॐ ह्रीं हं व्योमे ईश्वरी ऊर्ध्वे पातु

ए॰ न्या॰
५

ॐ ह्रीं सप्तद्वीपेश्वरी भुविपातु ॐ ह्रीं नागेश्वरी पा
तलेपातु ॐ इति मातृकागणन्यासस्तृतीयः
ॐ ह्रीं कमलांकुशमंडितानंदजापूर्वांगंपातु
ॐ स्त्रौं पुष्पपल्लवमूलादिहस्ताशाकंभरीप
श्चिमांगंपातु ॐ स्त्रौं धनुर्बाणधरा दुर्गावामां
गंपातु ॐ हूं शिरःपात्रधरा भीमामस्तकाच्च
रणावधिपातु ॐ श्रीं चित्रकांतिभृत्भ्रामरी

५

पादाभ्यां शिरःपर्यंतंपातु इति षड्देवीन्यासः च
तुर्थः ॐ ऐं ह्रीं ब्रह्मपादादिनाभिपर्यंतंपातु ॐ
ह्रीं श्रीं विष्णुः नाभ्यादिहृदयंपातु ॐ ह्रीं स्त्रौं
रुद्रः हृदयादिशिखापर्यंतंपातु ॐ ह्रीं हंसः
पादद्वयंपातु ॐ ह्रीं गजाननः सर्वांगानिपातु
ॐ ह्रीं सर्वानंदमयो हरिः परात्परे देहभागौपा
तु इति पंचमः ॐ ह्रीं अष्टादशभुजामहाल

ए॰न्या॰
८

क्ष्मीमध्यदेहंपातु ॐ ह्रीं क्लीं अष्टादशभुजाम
हासरस्वतीऊर्ध्वदेहंपातु ॐ ह्रीं ऐं दशभुजा
महाकालीअधोदेहंपातु ॐ ह्रीं क्ष्मौं हंसः
हस्तद्वयंपातु ॐ ह्रीं परमहंसः नेत्रद्वयंपातु
ॐ ह्रीं ह्रूं महिषेणसमायुक्तंप्रेतपदद्वयंपातु
ॐ ह्रीं महेशायनमः सर्वांगंपातु ॥ इतिषष्ठः
ॐ ऐंनमः ॐ ह्रींनमः दक्षिणनेत्रे ॐ क्लींन ८

मः वामनेत्रे ॐ चांनमः दक्षिणकर्णे ॐ मुंनमः
वामकर्णे ॐ डांनमः दक्षिणनासापुटे ॐ येंन
मः वामनासापुटे ॐ विंनमः मुखे ॐ चेंनमः
पा यो ॐ ऐंनमः पायौ ॐ ह्रींनमः मुखे ॐ
क्लींनमः इतिसप्तमः वामनासापुटे ॐ चांनमः द
क्षिणनासापुटे ॐ मुंनमः वामकर्णे ॐ डांन
मः दक्षिणकर्णे ॐ येंनमः वामनेत्रे ॐ

ॐ विंनमः दक्षिणनेत्रे ॐ चेंनमः ब्रह्मरंध्रे इत्यष्ट
मः ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे मस्तकाच्चरणाव
धिपूर्वांगंपातु ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे चरणान्
मस्तकावधिपूर्वांगंपातु ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे
मस्तकाच्चरणावधिदक्षिणांगंपातु ॐ ऐं ह्रीं क्लीं
चामुंडायैविच्चे चरणान्मस्तकावधिदक्षिणांगंपातु
ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे मस्तकाच्चरणावधिद
क्षिणांगंपातु ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे मस्तका

च्चरणावधिवामांगंपातु ॐ ऐं ह्रीं क्लीं चामुंडायै
विच्चे चरणान्मस्तकावधिपश्चिमांगंपातु ॐ ऐं ह्रीं
क्लीं चामुंडायैविच्चे मस्तकाच्चरणावधिवामांगंपातु
ॐ ऐं ह्रीं क्लीं चामुंडायैविच्चे चरणान्मस्तकावधि
वामांगंपातु इतिनवमः समस्तमूलमंत्रेणर्ष
डंगः तथैवशान्यादिदिग्वादिक ॐ ऐं खड्गिनी
शूलिनीघोरागदिनीचक्रिणीतथा॥ शं खि

नीचापिनीबाणाभृशुंडीपरिघायुधा॥१॥सौम्या
सौम्यतराशेषसौम्येभ्यस्त्वतिसुंदरी॥परापराणां
परमात्वमेवपरमेश्वरी २॥ यच्चकिंचित्क्वचिद्व
स्तुसदसद्वाखिलात्मिके॥तस्यसर्वस्ययाशा
क्तिः सात्वंकिंस्तूयसेतदा॥३॥यथात्वयाज
गत्स्रष्टाजगत्पात्यत्तियोजगत्॥सोपिनिद्रावशं
नीतःकस्त्वांस्तोतुमिहेश्वरः॥४॥विष्णुःशरी

रग्रहणमहमीशानएवच॥कारितास्तेयतोत
स्त्वांकस्तोतुंशक्तिमान्भवेत् ५ इतिपादादि
नाभिपर्यंतंकृष्णतरंमहाकालीस्वरूपंन्यसा
मि ॐ ह्रीं शूलेनपाहिनोदेवीपाहिखड्गेन
चांबिके घंटास्वनेननःपाहिचापज्यानिस्व
नेनच १ प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्ष
दक्षिणे॥भ्रामणेनात्मशूलस्यउत्तरस्यांत

दे॰न्या॰ थेश्वरी २ सौम्यानियानिरूपाणित्रैलोक्येविच
रंतिते यानिचात्यर्थघोराणितैरक्षास्मांस्तथा
भुवं ३ खड्गशूलगदादीनियानिचास्त्राणि
तेंबिके करपल्लवसंगीनितैरस्मान्रक्षसर्वतः
४ इतिनाभ्यादिकंठपर्यंतंबालार्कसदृश
प्रभंमहालक्ष्मीस्वरूपंन्यसामि ॐ क्लीं सर्व
स्वरूपेसर्वेशेसर्वशक्तिसमन्विते॥भयेभ्यस्त्रा ९

९

हिनोदेविदुर्गेदेविनमोस्तुते॥१॥एतत्तेवदनं
सौम्यंलोचनत्रयभूषितं॥पातुनःसर्वभूतेभ्यः
कात्यायनिनमोस्तुते २॥ज्वालाकरालमत्यु
ग्रमशेषासुरसूदनं॥त्रिशूलंपातुनोभीतेर्भ
द्रकालिनमोस्तुते॥३॥हिनस्तिदैत्यतेजां
सिस्वनेनापूर्ययाजगत्॥साघंटापातुनोदेवी
पापेभ्योनःसुतानिव ४॥असुरासृग्वसाप

कावर्त्तितस्तैकरोज्वलः॥ क्षमायखड्गोभव
तुचंडिकेत्वान्ननायर्थं ५ इतिकंठस्थादिमस्त
कपर्यंतं शुभ्रस्फटिकसंकाशांमहासरस्व
तीस्वरूपन्यसामि ध्यानं योगनिद्राहरेरु
क्तामहाकालीतमोगुणा मधुकैटभनाशा
र्थंयांतुष्टावांबुजासना ॥१॥ दशवक्त्रादश
भुजादशपादांजनप्रभा॥ विशालयाराजमा

नात्रिंशल्लोचनमालया २ स्फुरद्दशनदंष्ट्रासा
भीमरूपापिभूमिप॥ रूपसौभाग्यकांतीनांसा
प्रतिष्ठामहाश्रियां ३ खड्गबाणगदाशूलशं
खचक्रभुशुंडिभृत्॥ परिघकार्मुकंशीर्षंनिश्चो
तद्रुधिरंदधौ ४ एषासावैष्णवीमायामहा
कालीदुरत्यया॥ आराधितावशीकुर्यात्पूजा
कर्तुश्चराचरं ५ महालक्ष्मीध्यानं सर्वदे

वशरीरेभ्योयाविभूतामितप्रभा॥त्रिगुणासा
महालक्ष्मीःसाक्षान्महिषमर्दिनी॥१॥श्वेता
ननानीलभुजासुश्वेतस्तनमंडला॥रक्तम
ध्यरक्तपादानीलजंघोरुरुन्मदा॥२॥सुचि
त्रजघना।चित्रमाल्यांबरविभूषणा॥चित्रा
नुलेपनाकांतिरूपसौभाग्यशालिनी ३

अष्टादशभुजापूज्यासासहस्रभुजासती
आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमा
त् ४ अक्षमालाचकमलंबाणोसिःकु
लिशंगदा चक्रंत्रिशूलंपरशुःशंखोघं
टाचपाशकः ५ शक्तिर्दंडश्चर्मचापंपान
पात्रंकमंडलुः॥अलंकृतभुजामेभिरायु

ए.न्या. १२ धेःकमालासनां ॥६॥ सर्वदेवमयीमीशांमहाल
क्ष्मीमिमांनृप॥पूजयेत्सर्वलोकानांसदेवानांप्रभु
र्भवेत् ७ महासरस्वतीध्यानं गौरीदेहात्समु
द्भूतायासत्वैकगुणाश्रया॥साक्षात्सरस्वती
प्रोक्ताशुंभासुरनिबर्हिणी १ दधौचाष्टभुजा
बाणान्मुसलंशूलचक्रभृत् शंखंघंटांलां
गलंचकार्मुकंवसुधाधिप २ एषासंपूजिता ३२

भक्त्यासर्वज्ञत्वंप्रयच्छति॥निशुंभमथिनीदेवी
शुंभासुरनिबर्हिणी ३ नवोजपः